दिनाङ्क :-06.10.2025

प्रात: - 06:55

## निर्वाचन-आयोग-बिहार मतदान

मुख्य-निर्वाचन-आयुक्तः ज्ञानेश-कुमारः अवदत् यत् बिहार-विधानसभा-निर्वाचनस्य दिनाङ्कानां घोषणायाः विषये निर्णयः विचार्य शीघ्रमेव भविष्यति। निर्वाचन-आयोगस्य ह्यः राज्यस्य द्विदिवसीय-समीक्षा-यात्रायाः अन्तिमदिने पटना-नगरे प्रसारमाध्यमैः सह वार्तालापं कुर्वन् श्री. कुमारः अवदत् यत्, आयोगः राजनैतिक-दलैः सह चर्चां कृतवान्, तेषां विचारान् श्रुत्वा, मतदान-कार्यक्रमस्य अन्तिमनिर्धारणे सर्वेषु पक्षेषु विचारः करिष्यति। श्रीकुमारः अवदत् यत् मतदातृ-सूच्यां संशोधनम् विधिपूर्वकं उचितम् अस्ति।

## विदेश-मन्त्री/कौटिल्य-आर्थिक-सम्मेलने

विदेश-मन्त्री डॉ. एस्. जयशङ्करः अवदत् यत्, अद्यत्वेषु वर्षेषु युद्धस्य स्वरूपेषु मूलभूतपरिवर्तनम् अभवत्, उन्नतशस्त्रैः तथा तन्त्रज्ञानेन निर्मितानां सम्पर्करहित-युद्धाः नूतनयुगस्य विषये सूचयन्ति। ह्यः नवदिल्ल्यां कौटिल्य-आर्थिक-सम्मेलने भाषणं कुर्वन् सः एतत् उक्तवान्। अस्मिन् जटिलपरिस्थितौ भारतस्य स्थितिं प्रति डॉ. जयशङ्करः अवधानं दत्तवान् यत् नवदिल्ल्याः शक्तिः आन्तरिकक्षमता-निर्माणे निहितास्ति इति।

## गृहमन्त्री-अमितशाहः

केन्द्रीय-गृह-सहकारिता-मन्त्री अमितशाहः भारतस्य प्रथम-सहकारिता-आधारित-सङ्कोचित-जैव-वायु-स्प्रे-ड्रायर्-पोटाश्-ग्रैन्युल्-परियोजनायाः उद्घाटनम् अकरोत्। महाराष्ट्रस्य अहिल्या-नगर-मण्डलस्य कोपरगाव इत्यत्र सहकार-महर्षि-शङ्करराव्-कोल्हे-सहकार-शर्करा-संयंत्रे इयं परियोजना स्थापिता अस्ति। अस्मिन् अवसरे, संयंत्रस्य प्रशंसां कुर्वन् श्रीशाहः सी. एन्. जी. तथा पोटाश् इत्येतयोः उत्पादनं विपणनं च कृत्वा, वित्तीय-अर्थव्यवस्थायाः लाभान् प्रकाशितवान्। सः

अघोषयत् यत् एतादृशानि घटकानि शीघ्रमेव सम्पूर्णे देशे पञ्चदश सहकारी-शर्करा-संयंत्रेषु आरभ्यन्ते, यत्र महाराष्ट्रः अस्मिन् हरित-उपक्रमस्य नेतृत्वं करिष्यति इति अपेक्ष्यते।

## पीयूषगोयल-कतर

केन्द्रीयवाणिज्योद्योग-मन्त्री पीयूष् गोयलः अद्यारभ्य कतर देशस्य-दोहा-नगरे द्विदिवसीय यात्रायां भविष्यति। प्रवासावधौ श्री गोयलः स्वकीयेन समकक्षीयेन शेख् फैज़ल् बिन् थानी बिन् फ़ैज़ल् अल् थानी इत्यनेन सह कतर-भारत-संयुक्त-वाणिज्य-आयोगस्य उपवेशनस्य अध्यक्षः भविष्यति। वाणिज्य-उद्योग-मन्त्रालयः अवदत् यत् एषा यात्रा कतर-देशेन सह व्यापार-निवेश-सम्बन्धेषु भारतस्य महत्त्वं सूचयति।

## नागरिक-उड्डयन-महानिदेशालयः

नागरिक-उड्डयन-महानिदेशालयः उत्सव-कालात् पूर्वं विमानयान-शुल्कस्य प्रवृत्तिं समीक्षितवान्। नागरिक-उड्डयन-मन्त्रालयेन निदेशालयः विमानयान-शुल्कस्य निरीक्षणं कर्तुम् आज्ञापितः अस्ति, विशेषतः उत्सवेषु, मूल्यवृद्धेः सन्दर्भे समुचितानि उपायानि च कर्तुम्। डी.जी.सी.ए. इति संस्थया पूर्वमेव विमान-संस्थानां समक्षं प्रकरणमिदम् उपस्थापितं, अपि च अधिक-आवश्यकतां पूरयितुं अतिरिक्तानि विमानयानानि नियुज्य उत्सव-कालस्य कृते विमान-क्षमतां वर्धयितुं तान् आदिष्टम्। तस्य प्रतिक्रियारूपेण इण्डिगो-संस्था द्विचत्वारिंशत् क्षेत्रेषु त्रिंशोत्तर सप्तशतं, एयर्-इण्डिया, एयर्-इण्डिया-एक्स्प्रेस् च विंशति क्षेत्रेषु षडाशीत्यधिक चतुःशतं, स्पाइस्-जेट् संस्था च अष्टत्रिंशत् क्षेत्रेषु षड्चत्वारिंशोत्तर पञ्चशतं यावत् अधिकानि विमानानि चालयति।

## महिला-क्रिकेट

क्रिकेट्-क्रीडायां, ह्यः आई.सी.सी-महिलानां एकदिवसीय-क्रिकेट-विश्वचषक स्पर्धायां कोलम्बो-नगरस्य आर. प्रेमादास क्रीडांगणे भारत-पाकिस्तान देशयोः मध्ये स्पर्धायां भारतीय-महिला-दलेन पाकिस्तान-महिला-दलं अष्टाशीति धावनांकै: पराजितम्।